JOURNAL OF MANUSCRIPT STUDIES

Vols. XXVII & XXVIII (Combined) 1987-88

Editor

Dr. T. Bhaskaran

Joint Editor

Dr. K. Visweswari Amma

Oriental Research Institute and Manuscripts Library

University of Kerala, Kariavattom, Trivandrum.

The Govindacarita is a simple poem describing in ten cantos the story of Kṛṣṇa. The author of this poem is one Vasudeva. There are many writers in Kerala bearing the name and so there arises much confusion in identifying them exactly. The poet Vasudeva, the author of Govindacarita was a protege of King Ravivarman of Veṭṭattunād in the 16th century. Dr. Kunjunniraja opines that this Vasudeva is the author of Vāsudevavijayam also. Vasudeva's other works are Samkṣeparāmāyaṇa, Samkṣepabhārata and Kalyāṇanaiṣadha. The former two works narrate the stories of Rama and Mahabharata respectively in a very lucid and simple style. The Kalyāṇanaiṣadha is the story of Nala and Damayanti. In all these works excepting the Samkṣeparāmāyaṇa the king Ravivarman of Veṭṭattunād is praised and the colophons also point out that their author is Vasudeva. In addition the style of the works is almost the same. A stotra work Svetāraṇyastuti is also ascribed to this Vasudeva. But Ullur says that its author is a different person of the same name[1] The simple style of Govindacarita can be due to the fact that it is intended for the beginners. In the Vāsudevavijaya which is meant to illustrate the rules of Pāṇini we find a style quite different from that followed in the Govindacarita. The Vāsudevavijaya which was left unfinished by the author was completed by Narayana pandita composing the poem entitled Dhātukāvya. From the commentary of the Dhātukāvya we can know that Vasudeva author of the Vāsudevavijaya belonged to the village of

---

1 Keralasahityacaritram Part II Travancore University Publication 1954 p. 284

Perumanam. It is probable that this Vasudeva went to the court of King Ravivarman of Veṭṭattunād and enjoyed his patronage. This patron Ravivarman may be identified with he patron of Trikkanṭiyūr Acyutapiṣaroti who was the teacher of Narayanabhatta since Ravivarman is praised in his work the Praveśaka.[1] In that case Acycutapiṣaroti will be a contemporary of Vasudeva. A careful study of Vāsudevavijayam and its commentary will help us to find some similarity of this grammatical poem with the simple poems Govindacarita etc. Further the introductory verses of Govindacarita and the commentary of Vāsudevavijaya resemble very much.[2] All this may lead to the conclusion that the authors of the works. Vāsudevavijaya and Govindacarita are indentical.

There is another Sanskrit work by the name Govindacarita written by Mādāvil Valiya Kunjiraman Vaidyar.

The following manuscripts and transcript are used for preparing this edition

1 **MS** 8383 **C – क**

This is a palm - leaf manuscript written in Malayalam script. The number of folios is 42. There are on the average 7 lines per page and 24 letters per line. The number of granthas is 450. Size of the folio is 18 cms × 3.5 cms The work is complete. This manuscript is presented by Chirakkal Place Library

---

1 Keralasahityacaritram part II Travancore University Publication 1954 P. 284

2 श्रीमद्विघ्नेशवाग्देवीकार्तिकेयादिमूर्तये ।
नमोऽस्तु पत्ये भूतानां सदानन्दचिदात्मने ।।

Govindacarita

विघ्नेशभारतीव्यासगुरुशाब्दिकमूर्तये ।
नमोऽस्तु पत्ये भूतानां सदानन्दचिदात्मने ।।

Com on Vāsudevavijaya

2 **MS** 17508 A ख

This is a palm leaf manuscript. The script is Malayalam and the number of folios 74. There are 7 lines per page and 12 letters per line approximately. The number of granthas is 390 and the size of the folio 9 cms × 3 cms. The work is incomplete and extends only upto the end of Sarga 8. This manuscript is got from Paliam Estate, Chendamangalam.

3 **MS C** 2300 A – ग

This is a palm leaf manucript written in Malayalam script. The number of folios is 45. On an average there are 7 lines per page and 16 letters per line. The size of the folio is 15 cms × 3.5 cms and the number of granthas is 320. The work is incomplete and extends only up to the end of Sarga 7

4 **T** 998 A – घ

This is a Transcript written in Devanagari script. There are 37 pages. Approximately there are 16 lines per page and 16 letters per line. The number of granthas is 325. The work is incomplete and extends only upto the end of Sarga 7.

5 **MS** 21717 I – ङ

This is a palm leaf manuscript. The number of folios is 12 and the script is Malayalam. There are 9 lines per page and 30 letters per line approximately. The size of the folio is 24.5 Cms × 4 Cms. The work is incomplete. It begins with the middle of Sarga 2 and extends upto the end of Sarga 8. This manuscript is got from Vadakkepara Matham, Aimanam Kudamalur, Kottayam.

I am grateful to Dr. T. Bhaskaran, Director of this Institute for the valuable guidance he has given me in bringing out this edition.

Dr. K. Visweswari Amma

गोविन्दचरितम्

प्रथमः सर्गः

[1]गुरूणां चरणाम्भोजपरागपरमाणवः ।
मनोमुकुरमस्माकं पुनीयुरनुवासरम् ॥ १

श्रीमद्विघ्नेशवाग्देवीकार्तिकेयादिमूर्तये ।
नमोऽस्तु पत्ये भूतानां सदानन्दचिदात्मने ॥ २

कुन्दसूनुमनोहारिमन्दहासविराजितम् ।
नन्दगोपकुलोत्तंसमिन्दिरारमणं भजे ॥ ३

नमो भगवते तस्मै व्यासरूपाय विष्णवे ।
यत्प्रसादेन [2]हि ज्ञेयं वस्तु जानन्ति मानवाः ॥ ४

अस्ति श्रीमत्प्रकाशेन्द्र[3]वंशमङ्गल्यभूषणः ।
रविवर्मा महीपालः सतां सुकृतमाधुरी ॥ ५

यं सर्वगुणसम्पन्नं समाश्रित्य सरस्वती ।
श्रीश्च न स्मरतो जातु प्रियावेकगुणाश्रयौ ॥ ६

तस्य धर्मात्मनः प्रीत्यै गोविन्दचरितं वयम् ।
ब्रूमः संक्षिप्य सुतरां प्रसीदन्त्विह देशिकाः ॥ ७

श्रीमती शूरसेनेषु बभूवातीव पावनी ।
मथुरा नाम नगरी यदूनां पुण्यकर्मणाम् ॥ ८

उग्रसेनो नृपस्तस्यां वसन् राज्यमपालयत् ।
अनुजेन सह श्रीमान् देवकेन महात्मना ॥ ९

क्षेत्रजस्तस्य पुत्रोऽभूत् कंसो नाम [4]महाबली ।
देवकस्य च कन्या[5]सीद् देवकी नाम शोभना ॥ १०

1 श्लोकोऽयं ग घ पाठयोरेव दृश्यते
2 विज्ञे ख 3 न्दु घ
4 खलो ब. ख. ग. घ 5 भूद् ग. घ

तां काले यादवश्रेष्ठो वसुदेवो महामतिः ।
परिणीय तया सार्धं स्वगृहं[1] गन्तुमुद्यतः ॥ ११

रथमारुह्य सहितो बन्धुभिः सह मेनया ।
वाद्यघोषेण महता ययौ शौरिर्मुदान्वितः ॥ १२

कंसस्तु [2]भगिनीस्नेहात् तयोः सारथ्यमादधे ।
तदा संबोध्य तं व्योम्नि वागुवाचाशरीरिणी ॥ १३

"[3]कंस यां नयसेऽस्यास्त्वां हनिष्यत्यष्टमः सुतः"।
तच्छ्रुत्वा कुपितः कंसस्तां हन्तुं खड्गमादधे ॥ १४

तथा तां दुर्मतिं क्रूरं कर्म कर्तुं समुद्यतम् ।
सान्त्वयामास बहुधा वसुदेवो भयाकुलः ॥ १५

[4]जातं जातममुष्यास्ते पुत्रं दास्यामि हे नृप' ।
इति कृत्वा स समयं तस्माद् भार्याममोचयत् ॥ १६

गते कंसे स्वनिलयं वसुदेवस्तया सह ।
स्वगृहं प्राप्य मुमुदे धार्मिकोऽभ्यर्चयन्[5] हरिम् ॥ १७

तदा दुर्जनभारेण पीड्यमाना वसुन्धरा ।
ब्रह्मणे लोकनाथाय स्वदुःखं संन्यवेदयत् ॥ १८

पुरा देवासुरे युद्धे हता ये दानवा विभो ।
भूलोके तेऽधुना[6] जाताः सतां पीडां वितन्वते ॥ १९

कंसचैद्यजरासन्धदन्तवक्त्रमुखान् नृपान् ।
दैत्यांशजांस्तथान्यांश्च वोढुं नाहं क्षमे खलान् ॥ २०

तच्छ्रुत्वा भगवांस्तेषां विनाशाय दुरात्मनाम् ।
तया देवैश्च सहितस्तुष्टाव मधुसूदनम् ॥ २१

1 गे ग. घ 2 सहितो मानी ग. घ 3 हन्त ख. ग
4 सान्त्वनैः स मुमोचैनां यन्नासौ पुनरूचिवान् । ग
5 द्धरिम् ॥ घ 6 नोद्भूताः ग. घ

अंशद्वयेन भूलोके वसुदेवस्य भार्ययोः ।
अवताराय सुप्रीतो दैत्यारिरकरोन्मनः ।। २२
तस्य साहाय्यकं कर्तुं [1]यदोर्वंशेषु विश्रुताः ।
अजायन्त सुराः सर्वे पूजार्थं च सुरांगनाः ।। २३
आदिष्टा हरिणा माया षड्गर्भान् जगदीश्वरी ।
चकार गर्भे देवक्या जातान् कंसोऽवधीच्च तान् ।। २४
यदून् गोपांश्च नन्दाद्यान् देवांशान् सह बन्धुभिः ।
आत्मानमसुरं विष्णुं देवक्याश्चाष्टमं सुतम् ।। २५
आकर्ण्य नारदात् कंसः पीडयामास तान् बली ।
देवकीं वसुदेवं च बध्द्वा कारागृहे न्यधात् ।। २६
उग्रसेनं च पितरं बध्वा वृद्धं बली बलात् ।
स जहार मधूपघ्नं शूरसेनं[2] च दुर्मतिः ।। २७
पण्डितास्तेन ते प्रायः सकुटुम्बा ययुर्दिशः[3] ।
रोहिणी वसुदेवस्य भार्या नन्दव्रजेऽवसत् ।। २८
देवक्याः सप्तमं गर्भमनन्तं प्राप्य[4] रोहिणी ।
नन्दपत्न्या यशोदाया माया गर्भमया[5]त् स्वयम् ।। २९
[6]रोहिणी तु सुतं सूते बलं बलवतां वरम् ।
ततोऽभवद् गर्भगतो देवक्या लोकनायकः ।। ३०

1 राज क   2 नांश्च क   3 शम् । ग. घ
4 प ख   5 गा क
6 अथ विष्णुः स्वयं तस्याः देवक्या गर्भमाविशत् ।
ब्रह्मरुद्रादयो देवा गर्भस्थं देवमस्तुवन् ।।
रोहिणी तु महाभागा वसन्ती नन्दवेश्मनि ।
तनयं जनयामास कुन्दमन्दारसन्निभम् ।।
श्रावणे मासि रोहिण्यामर्धरात्र्यां विधूदये ।
लोकानन्दाय देवक्यामाविरासीदधोक्षजः ।।
शङ्खचक्रगदापद्मैर्भ्राजमानं जगत्पतिम् ।
भक्त्या स्तुवातां पितरौ मुक्तबन्धौ मुदाकुलौ ।

महसा वैष्णवेनासौ शुशुभे सा यशस्विनी ।
काले तत्रागतः कंसो दृष्ट्वा गर्भं सुदारुणम् ॥ ३१
नियुक्तः सचिवांस्तत्र सू(?वी)क्षितुं पुत्रसम्भवम् ।
तत्र गत्वा समं देवैरब्जयोनिर्जनार्दनः ॥ ३२
स्तुत्वा बहुविधस्तोत्रैर्जगामात्मपदं मुदा ।
काले सिंहगते सूर्ये देवक्यास्तनयो हरिः ॥ ३३
अष्टमीयुतरोहिण्यामर्धरात्रावजायत ।
तौ दम्पती निजं पुत्रमवतीर्णं जनार्दनम् ॥ ३४
ज्ञात्वा स्तुत्वा नमस्कृत्य स्थितावेवं जगाद सः ।
"नयस्व मां व्रजे तात नन्दपत्न्यास्सकाशतः ॥ ३५
आनीयतां सुता"मेवं श्रुत्वा शौरिस्तथाऽकरोत् ।
विष्णुमायां सुतां सूत्वा संविशन्तीं ददर्श सः ॥ ३६
स्वपुत्रं शयने तस्या निधायादाय कन्यकाम् ।
आगत्य न्यस्य देवक्याः शयने पूर्ववत्स्थितः ॥ ३७
शिशोराकर्ण्य रुदितं प्रबुद्धाः रक्षिणः क्षणात् ।
गत्वा कंसाय जगदुः प्रसूतां देवकीं निशि ॥ ३८
स चागत्य गृहीत्वा तां शिलायामक्षिपद्रुषा ।
सोत्पपात करात्तस्य दिव्यरूपधरा दिवम्[1] ॥ ३९

पूर्वजन्मद्वयं पित्रोर्वरदानं तपोबलात् ।
पुत्रत्वं चात्मनस्तत्र ताभ्यामावेदयत् प्रभुः ।
स्वीकृतार्भकरूपं तं गृहीत्वा स्नेहविह्वलः ॥
नन्दस्य गोष्ठमविशच्छौरिः कंसभयान्निशि ॥
तदा सुप्तजने गोष्ठे यशोदानन्दवल्लभाम् ।
विष्णुमायां क

1 वि क

"शत्रुस्ते वर्धते भूमौ किं फल हतया मया"।
इत्युक्त्वा सहसा कंसं सुरलोकं जगाम सा ।। ४०
पश्चात्तापान्वितः कंसो वसुदेवं सभार्यकम् ।
विमुच्य स्वगृहं गत्वा प्रातर्बन्धून् समाह्वयत् ।। ४१
गवां द्विजानां साधूनां शिशूनांश्च निबर्हणे ।
आदिदेशाथ तान् बन्धून् प्रलम्बप्रमुखान् नृपः ।। ४२

[1]विहितानमनेषु तथेति मुदा
सहितेषु च तेषु गतेषु ततः ।
उपरोधरतो जपहोमकृता-
मवरोधमवाप नराधिपतिः ।। ४३

1 तदनु दनुतनूजा भर्तुरादेशतस्तै
सकलदिशि चरन्तः पीडयामासुरुर्वीम् ।
निजरिपुमपि बालं यत्रकुत्रावसन्तं
विवशतरलचित्ताः सर्वथान्वेष्यमाणाः ।। ग घ

द्वितीयः सर्गः

[1]अथ निद्राविमुक्ता सा यशोदातिमनोहरा ।
पुत्रं नवाम्बुदच्छायं दृष्ट्वा [2]तुष्टाभवद् भृशम् ॥ १

नन्दो दृष्ट्वात्मजं जातमतिरम्यं मुदाकुलः ।
जातकर्माकरोद् दत्वा द्विजेभ्यो विविधं धनम् ॥ २

गोपनाथस्य नन्दस्य जाते प्रवयसः सुते ।
व्रजे हृष्टजने तस्मिन् सुमहानुत्सवोऽभवत् ॥ ३

तौ बालकौ व्रजे तत्र शेषविष्ण्वंशसम्भवौ ।
शुशुभाते महात्मानौ सुतावानकदुन्दुभेः ॥ ४

आज्ञया भोजराजस्य शिशूनां नाशकारिणः ।
तत्र तत्र चरन्ति स्म दानवा राक्षसास्तथा ॥ ५

गृहीत्वा मानुषं रूपं विषदिग्धपयोधरा ।
कदाचित् प्राविशद् गोष्ठं पूतना नाम राक्षसी ॥ ६

सा बालं हरिमादाय मुखे तस्यार्पयत् स्तनम् ।
क्रुद्धो देवस्तदा तस्याः स्तनं प्राणैः सहाऽपिबत् ॥ ७

1 नन्दगोपस्त्वथो जाते नन्दने सह भूसुरैः ।
सानन्दं जातकर्माणि रौहिणेयस्य सोऽकरोत् ॥
ततः कंसाय नन्दोऽसौ करं दातुं जगाम सः ।
तत्र शौरिं च दृष्ट्वा तौ कुशलवादिनौ ॥
ऊचतुस्तनयोदन्तं दानवानां च चेष्टितम् ।
तत्रोत्पातानि दृष्ट्वेमौ संभ्रमेण समञ्चितौ ॥
नियुक्तो वसुदेवेन नन्दो यातः ससाध्वसम् ।
सञ्चिन्त्य विपदं गोष्ठे गोपैः सह जवाद् ययौ ॥
कंसेन संनियुक्तास्ते जगत्पीडनतत्पराः ।
तत्र तत्र ग, घ

2 हृ ख

विवशा सा निजं रूपमास्थायातिभयङ्करम् ।
पपात विगतप्राणा कम्पयन्ती वसुन्धराम् ॥ ८

तस्याः शरीरं विपुलं खण्डयित्वा परश्वधैः ।
दग्ध्वा गोपाः पुनर्मन्त्रैः रक्षां बालस्य चक्रिरे ॥ ९

निद्रायुक्तं कदाचित्तं शाययित्वाऽनसोन्तिके ।
द्विजानभोजयन् माता [1]तज्जन्मर्क्षोत्सवागतान् ॥ १०

दैत्येनाविष्टमाज्ञाय शकटं [2]त्यक्तनिद्रकः ।
उत्क्षिप्तेन रुदन् देवः पादाब्जेन बभञ्ज तत् ॥ ११

एकदा शिशुमादाय ददमाना स्तनं मुदा ।
गरिम्णा पीडिता तस्य न्यधात्तं[3] जननी भुवि ॥ १२

तृणावर्त इति ख्यातो वात्यारूपधरोऽसुरः ।
विमोह्य पांसुभिर्गोपान् जहार शिशुमुद्धतम् ॥ १३

कण्ठे गृहीत्वा बालेन विवशः स्वेन वर्ष्मणा ।
पपात व्यसुराकाशात् सोऽसुरश्चालयन् भुवम् ॥ १४

गोपाः कथञ्चिदादाय क्रीडन्तं तस्य वक्षसि ।
बालकं प्रददुर्मात्रे रुदत्यै सस्मिताननम् ॥ १५

कदाचिज्जृम्भमाणस्य कृष्णस्योत्सङ्गशायिनः ।
मुखे[4] वीक्ष्य जगन्माता जगाम भयविस्मयौ ॥ १६

गर्गो यदुकुलाचार्यः कदाचित् प्राप्य तद्गृहम् ।
अलंचकार तौ बालौ रामकृष्णादिनामभिः ॥ १७

अथ तावङ्कणे तत्र रिङ्खन्तौ [5]स्मरसुन्दरौ ।
करीषभस्मजंबालरूषितौ राजतस्तराम् ॥ १८

1 जन्मर्क्षोत्सवमाग ग, घ

2 जात ग, ध   3 त्तज्जन क

4 खं क   5 स्म शनैः शनैः। क

पाणिभ्यां सह जानुभ्यां विचरन्तौ कथञ्चन ।
गृहकर्मसु सुव्यग्रौ मातरावनुजग्मतुः ।। १९

अवलम्ब्याङ्गुलिं स्त्रीणां पाणिभ्यां परमोत्सुकौ ।
कोमलाभ्यां पदाब्जाभ्यां चेरतू रामकेशवौ ।। २०

आहूयमानौ गोपीभिर्गृहीतं तत्कराङ्गुलम् ।
पतनोत्थानविवशं प्रापतुस्तौ तदन्तिकम् ।। २१

किङ्किणीनूपुरग्रैवकटकाङ्गदभूषितौ ।
क्रमेण वर्धमानौ तौ पञ्चवर्षौ बभूवतुः ।। २२

गोपीर्वञ्चयमानोऽथ प्रविश्य भवनोदरम् ।
कृष्णः पयः समापीय व्याकुलीकुरुते स्म ताः ।। २३

मुष्णन् हैय्यंगवीनं सा विलाळेभ्यो ददत् पयः ।
नखैश्च वितुदन् बालान् [1]कोपयामास गोपिकाः ।। २४

नवनीतं विमुष्णन्तं तं गृहीत्वा कदाचन ।
बन्धमोक्षकरं माता बबन्धोल्लूखले सुतम् ।। २५

यमळार्जुनयोर्मध्यं[2] प्रविशन् स उलूखलम् ।
कर्षन्नाशु तिरश्चीनं पातयामास तौ[3] भुवि ।। २६

तौ मुक्तशापौ द्रुमतां त्यक्त्वा वैश्रवणात्मजौ ।
दामोदरं नमस्कृत्य स्तुत्वा स्वपदमीयतुः ।। २७

नन्दो विमुच्य तं बद्धं बाष्पपर्याकुलेक्षणः ।
आलिलिङ्गन्मुहुर्गाढं यशोदां वचनैः क्षिपन् ।। २८

1 कम्प– ग, घ 2 ध्ये– घ
3 तेन तौ ।। ख

अनेका विपदस्तस्मिन्ननुभूय बृहद्वने ।
स्थानान्तरं ततो गन्तुमियेष स भयाकुलः ।। २९

गोवर्धनाद्रेरासन्नं यमुनातीरमाश्रितम् ।
रम्यं वृन्दावनं प्रापुः सर्वे ते सह गोधनैः ।। ३०

सप्तवर्षौ तदा बालौ बालकैरपरैः सह ।
व्रजस्य सविधे वत्सान् पालयन्तौ विजह्रतुः ।। ३१

जिघांसुमसुरं तत्र प्राप्तं गोवत्सरूपिणम् ।
गृहीत्वा प्रसभं कृष्णो निनाय यममन्दिरम् ।। ३२

तथा बकासुरं क्रूरं बकरूपं जनार्दनः ।
प्रगृह्य चञ्चुपुटयोः पाटयामास लीलया ।। ३३

विविधकेलिविशेषविशारदौ
विबुधवैरिविनाशविधायिनौ ।
विदधतौ जगदाहितसम्मदं
विपिनसीमनि तौ विरराजतुः ।। ३४

तृतीयः सर्गः

कदाचिद् बालकाः सर्वे वनं प्राप्य तृणान्वितम् ।
चारयन्तो [1]मुदा वत्सान् क्रीडन्ति स्म यथारुचि ।। १

तत्र कश्चिदघो नाम कंसभृत्यो महासुरः ।
तान् हन्तुं शयुरूपेण पथि शिश्येऽद्रिसन्निभः ।। २

तेऽविशन्नाननं तस्य गुहां मत्वा सवत्सकाः ।
कृष्णस्तान् रक्षितुं पश्चात् प्राविशत् कृपया विभुः ।। ३

तस्य कण्ठान्तरं प्राप्य क्षणेन ववृधे हरिः ।
निरुद्धमार्गास्तत्प्राणाः शिरो भित्वा बहिर्ययुः ।। ४

जीवयित्वा मृतान् सर्वांस्तान् कृष्णः सह तैः पुनः ।
स्तूयमानः सुरैस्तस्य निर्ययौ मुखगह्वरात् ।। ५

कृष्णे निलीनमालोक्य तेजोरूपमघासुरम् ।
विस्मिता ब्रह्मरुद्राद्यास्तुष्टुवुः खे तमीश्वरम् ।। ६

कृष्णस्तु सह मध्याह्ने सवयोभिः क्षुधान्वितैः ।
यमुनापुळिने रम्ये भोक्तुमारभते स्म सः ।। ७

तदानीं तृणलोभेन तर्णकानतिदूरगान् ।
निन्ये देशान्तरं ब्रह्मा पद्मनाभं परीक्षितुम् ।। ८

तेषामन्वेषणव्यग्रे कृष्णे गोपार्भकानपि ।
अन्तर्धाप्य चतुर्वक्त्रः स्वयं चान्तर्दधे क्षणात् ।। ९

उभयानपि[2] तान् कृष्णो वनेऽन्विष्यानवेक्ष्य च ।
विचिन्तयन् ब्रह्मकृतं सहसा तदवबुद्ध्यत ।। १०

ततस्तत्प्रीतये विष्णुर्यद्यत्तेन तदाहृतम् ।
तत्तदात्मा स्वयं भूत्वा पूर्ववत् प्राविशद् व्रजम् ।। ११

1 य - ग.घ 2 भंकान् ग, घ

तथा संक्रीडमानस्य तस्य मानुषमानतः ।
भूतप्राया शरदभूद् ब्रह्ममानेन तु त्रुटिः ।। १२
दृष्ट्वात्मना हृतेभ्योऽन्यांस्तादृशानेव तावतः ।
वत्सान् [1]बालांश्च लोकेशः संशयेनाकुलोऽभवत् ।। १३
[2]सर्वांस्तान् वैष्णवं रूपं बिभ्राणान् दर्शयन् क्षणम् ।
पुनः स्वात्मनि संहृत्य तस्थौ पूर्ववदच्युतः ।। १४
भूयो भूयो नमस्कृत्य स्तुत्वा देवं प्रसाद्य च ।
लब्धानुज्ञस्ततो ब्रह्मा [3]स्वर्लोकं विस्मितो ययौ ।। १५
अजानद्भिरिदं किञ्चिन्मायासंमोहितैर्विभुः ।
सह तैः प्राविशद् गोष्ठं वेणुशृङ्गकलस्वनैः ।। १६
तौ कदाचन बालानां गिरा तालफलार्थिनाम् ।
रामाच्युतौ तालवनं प्राप तामसुरास्पदम् ।। १७
तस्मिन् वसन्तं दैतेयं धेनुकं गर्दभाकृतिम् ।
सानुजः सहितं मित्रैरवधीद्रोहिणीसुतः ।। १८
व्रजस्य सविधे तत्र कालियो नाम नागराट् ।
उवास गरुडाद् भीतस्तेनागम्ये नदीह्रदे ।। १९
तन्निरासेन तत्स्थानमुपभोगक्षमं नृणाम् ।
करिष्यन्नगमत्तत्र विना रामेण केशवः ।। २०
नीपमारुह्य तस्याग्रात् सोऽपतद् यमुनाम्भसि ।
चुक्षोभ जलसंक्षोभान्नागराजस्तदाश्रयः ।। २१
स आगत्य[4] रुषा कृष्णं जिघांसुः प्रायतच्चिरम् ।
कृष्णोऽपि तस्य प्रसभमारोहत् फणमण्डलम् ।। २२

1 पा ग, घ, ङ

2 बिभ्राणं वैष्णवं रूपं क्षणं सर्वान् प्रदर्श्य तान् । ग, घ

3 स्वं लो ङ   4 म्य मुदा ग घ ङ

ततः सस्त्रीकुमाराणामागतानां व्रजौकसाम् ।
पश्यतां विबुधानां च सोऽनृत्यत् तत्फणोपरि ॥ २३
दृष्ट्वा पतिं मुकुन्दाङ्घ्रिपरिपिष्टफणा[1]न्वितम् ।
सार्भका नागपत्न्यस्तमस्तुवन् भयपीडिताः ॥ २४
विसृष्टः कलियस्तेन दत्तानुज्ञो दयालुना ।
ययौ रमणकं[2] द्वीपं तत्पदालङ्कृतैः फणैः ॥ २५
कृष्णो निशि तमिस्रायां न्यवसत् सरितस्तटे ।
समन्तादुत्थितं दावं पीत्वाऽरक्षत् स्वबन्धुताम् ॥ २६
अथैकदा वने तत्र क्रीडतो रामकृष्णयोः ।
वधार्थमागतो दैत्यः प्रलम्बो गोपकाकृतिः ॥ २७
स्कन्धे निधाय तेनाशु नी[3]यमानो हलायुधः ।
निर्बिभेद शिरस्तस्य वज्रकल्पेन मुष्टिना ॥ २८
पालयन् गोकुलं कृष्णो मुञ्जाटव्यां परिभ्रमन् ।
जातु[4] तद्रक्षतुं विष्वग्ज्वलन्तमपिब[5]द्दवम् ॥ २९
एधमानः क्रमादेवं गोकुले देवकीसुतः ।
रूपेण च गुणैश्चैव जहार हृदयं नृणाम् ॥ ३०
मधुरस्मितसल्लापविभ्रमापागंवी[6]क्षणैः ।
हृदयेषु मृगाक्षीणां मनोभवमजीजनत् ॥ ३१
वने विहरमाणस्य तस्य वेणुस्वनं शिवम् ।
आकर्ण्य गोपवनिता बभूवुः कामपीडिताः ॥ ३२

शोणाधरं शोभनमन्दहासं
चलाळकं चारुकटाक्षपातम् ।
मुखारविन्दं न मुमोच शौरे-
र्मनो मुनीनामिव गोपिकानाम् ॥ ३३

1 शतम् क — 2 कद्वी ख, घ
3 ध्रियमाणो ग, ङ — 4 तुचिद्र ख
5 द्रुतम् ॥ ग, घ, ङ — 6 क्षितैः । ख, ग, घ, ङ

चतुर्थः सर्गः

अथ कृष्णं पतिं लब्धुं वाञ्छन्त्यो गोपकन्यकाः ।
कात्यायनीं समानर्चुः कार्तिके मासि सुव्रताः ॥ १

स्नान्तीनामेकदा तासां प्रभाते यमुनाजले ।
न्यस्तानि तीरे वासांसि हृत्वारोहत्तरुं हरिः ॥ २

ताः कृष्णस्याज्ञया तोयात् समुत्तीर्य कथञ्चन ।
कृताञ्जलिपुटा[1]स्तस्मात् प्रीताद्वासांसि लेभिरे ॥ ३

अन्वगृह्णाच्च तत्तासां कांक्षितं कमलेक्षणः ।
ताः प्रीता स्वगृ[2]हं जग्मुश्चित्तेनादाय तं प्रियम् ॥ ४

जातु कृष्णस्य वचसा प्राप्य गोपा बुभुक्षिताः ।
तस्य [3]सानुचरस्यान्नमयाचत् सत्रिणो द्विजान् ॥ ५

अनादृतास्तैस्तत्पत्नीः प्रणम्याथ ययाचिरे ।
[4]ता रुद्धा अपि पत्याद्यैरन्नमादाय निर्ययुः ॥ ६

ताभ्यः स्वीकृत्य कृष्णोऽन्नम[5]भिनन्द्य च ताः सतीः ।
धर्मपालो यियासन्तीरपि गेहान्ययापयत् ॥ ७

पत्या निरुद्धा तत्रैका दृढमालिङ्ग्य चेतसा ।
कृष्णं तत्पदवीं लेभे तत्क्षणान्मुक्तबन्धना ॥ ८

अथ प्राप्ते शरत्काले गोपा नन्दपुरोगमाः ।
मखोत्सवं महेन्द्रस्य विधातुमुदयुञ्जत ॥ ९

1 टाः कन्यास्तस्माद्वा ग, घ, ङ

2 पुरं ग, घ, ङ

3 चा ग, ङ 4 निरु ङ

5 नुगृह्याथ ताः ङ

वज्रपाणेर्मदं हर्तुं वाचोयुक्तिप्रतारितैः ।
गोपैर्गोविप्रशैलानां कृष्णो मखमकारयत् ॥ १०

मखे प्रतिहते तत्र मघवा कुपितो भृशम् ।
नन्दगोष्ठविनाशाय महामेघानचोदयत् ॥ ११

विद्युद्भिः स्तनितैश्चोग्रैश्चक्षूंषि श्रवणानि च ।
ते प्रजानां प्रतिघ्नन्तो ववृषुः सलिलं बहु ॥ १२

इरम्मदश[1]तापातदह्यमानजनद्रुमम् ।
महीतलमविज्ञेयनिम्नोन्नतमभूज्जलैः ॥ १३

वातवर्षाशनित्रस्ताः सस्त्रीबा[2]लाः सगोधनाः ।
अनन्यशरणा गोपाः शरणं प्रापुरच्युतम् ॥ १४

तान् रक्षितुमनाः कृष्णः [3]प्रहस्यैकेन पाणिना ।
गोवर्धनं समु[4]त्थाप्य छत्रतामनयद् गिरिम् ॥ १५

सुविस्तीर्णमधः श्वभ्रं गिरेर्गोपा हरेर्गिरा ।
प्रविश्य तस्मिन् सुसुखं न्यवसन् सपरिच्छदाः ॥ १६

अहस्वदृष्टेषु सूर्येषु तथा वृत्तेषु सप्तसु ।
तुराषाट् भ्रष्टसङ्कल्पः श्रान्तान् मेघानवारयत् ॥ १७

महत्युपरते वर्षे व्यभ्रे नभसि च प्रभुः ।
निर्याप्य सुहृदो गर्तात् स्थापयामास पर्वतम् ॥ १८

तमासाद्य सुरैः सार्धं भग्नदर्पः सुरेश्वरः ।
सुरभ्या च गवां माता तुष्टाव रहसि प्रभुम् ॥ १९
अभिषिच्य च गोविन्दं क्षीरैः सुरभिगङ्गयोः ।
गोविन्द इति च ख्यातं नाम पापहरं ददौ ॥ २०

1 गदा क   2 पोताः क ख
3 सह्यै ङ   4 त्पाट्य क, ख

अन्त्र[1]शिष्टं [2]प्रयातं तं समनुज्ञाय माधवः ।
[3]रमयामास गोष्ठेषु बिजहार सहाग्रजः ।। २१

उपोष्यैकादशीं [4]स्नान्तं द्वादश्यां यमुना[5]म्भसि ।
निनाय मन्दमसुरः कदाचिद्वरुणा[6]न्तिकम् ।। २२

तमनालोक्य दुःख्यत्सु बान्धवेषु कृपान्वितः ।
सर्वज्ञः सहसा कृष्णः प्राप्तः प्राचेतसं पुरम् ।। २३
[7]प्रणतः पूजितस्तेन स्तुतश्च वरुणेन सः ।
आनिनाय पुनस्तातं क्षणादेव निजं पदम् ।। २४

वर्तमानस्तथा तस्मिन् नन्दगेहे रमापतिः ।
गाढोत्कण्ठार्दिता गोपीश्चक्रे रमयितुं मनः ।। २५
त्रिगुणानिलसञ्चारसुभगे चन्द्रिकोज्वले ।
विहरन् स वने रम्यं वेणुनादमुदीरयत् ।। २६
तं निशम्य स्मरावेशविवशा गोपयोषितः ।
सर्वकर्माणि संत्यज्य सद्यः तत्सविधं ययुः ।। २७

सकलापकृतापीडाः सकला गोपबालिकाः ।
रमयामास विपिने रमया सदृशीर्वशीः ।। २८

तस्यात्मविषयं दृष्ट्वा क्रीडतः परमादरम् ।
स्त्रियो बभूवुरत्यर्थं सौभाग्यमदगर्विताः ।। २९
तासां गर्वायमाणानां दृष्ट्वा भावं तथाविधम् ।
तच्छान्त्यै सहसा कृष्णस्तत्रैवान्तर्हितोऽभवत् ।। ३०

1 नु क 2 महेन्द्रं क
3 पालयन् गोकुलं गोष्ठ वि क, ख
4 नन्दो ग, घ, ङ 5 जले ग घ ङ
6 लयम् । ङ 7 मोदात् ख

सद्यः कान्तमपश्यन्त्यो गोपिकाः खिन्नचेतसः ।
तत्र तत्र वनोद्देशे विचि[1]क्युरतिवि[2]क्लबा ॥ ३१
आचन्द्रास्तमयात् कान्तमन्विष्यानवलोक्य [3]ताः ।
उपविष्टाः प्ररुरुदुर्विलेपु[4]स्तत्कथा जगुः ॥ ३२
तासां विगतदर्पाणां भक्ता[5]नां स[6] प्रसेदिवान् ।
आत्मानं दर्शयामास दर्शनीयतमं पुरः ॥ ३३
परमानन्द[7]युक्ताभिः प्रियाभिस्ताभिरन्वितः ।
चकार तरुणस्तत्र रासक्रीडां मनोहराम् ॥ ३४
एवं वने च तोये च सरितः पुलिनेषु च ।
विजहार निशा बह्वीः प्रियाभिः साग्रजो हरिः ॥ ३५
जातु नन्दपुरोगास्ते गोपाला बालकैः सह ।
अम्बिकावनमासाद्य सा[8]म्बं शिवमपूजयत् ॥ ३६
शयानं जगृहे तत्र नन्दं निशि महानहिः ।
स कृष्णेन पदा स्पृष्टः सद्यो विद्याधरोऽभवत् ॥ ३७
मुक्तः सोऽगिरसः शापादुक्त्वा वृत्तान्तमात्मनः ।
स्तुत्वा कृष्णं निजं स्थानं जगाम तदनुज्ञया ॥ ३८
शङ्खचुडस्य [9]यक्षस्य हरतो जातु गोपिकाः ।
मुष्ट्या निष्पिष्टशिरसो जह्रे चूडामणिं हरिः ॥ ३९
प्रातर्वनं गते कृष्णे तद्वियोगाधिपीडिताः ।
बुद्ध्या तद्गतया गोप्यो गिरा [10]चाहान्ययापयत् ॥ ४०

रूपामृतेन नयनानि शरीरभाजां
लीलायितेन हृदयानि विलासिनीनाम् ।
शौरिर्व्रजे स विजहार ह[11]रन् नरीणां
प्राणांस्तथा भुजबलेन बलेन सार्धम् ॥ ४१

1 क्य र क 2 क्लाः ख 3 तम् ख
4 स्तास्तथा ङ 5 न्ना ब, ङ 6 संप्र ग घ ङ
7 बध्दा ङ मु ग, घ 8 पूजयन्ति स्म शङ्करम् क
9 हरतो विपिने जा ग, घ, ङ
10 लालान्वयाचयन् घ
लीलां च याचयन् ङ
11 रीश्वराणां ग, घ, ङ

पञ्चमः सर्गः

अथ कंसाज्ञया कश्चिदरिष्टो नाम दानवः ।
महोक्षरूपः संप्राप्य त्रासयामास गोकुलम् ।। १
तं प्रसह्य गृहीत्वाजौ कण्ठे निष्पीड्य पाणिना ।
गमयामास गोविन्दो धर्मराजनिके[1]तनम् ।। २
नारदो मथुरां गत्वा संभवं रामकृष्णयोः ।
कंसाय कथयामास सम्यग् वृद्धिं च गोकुले ।। ३
ततश्चुक्रोध सहसा वासुदेवाय भोजराट् ।
आददे [2]च शितं खड्गं तस्मै संरक्तलोचनः ।। ४
वारितो मधुरैर्वाक्यैर्नारदेन ततो रुषा ।
निगळैस्तं यदुश्रेष्ठं बबन्ध सह भार्यया ।। ५
अक्रूरं चादिशद्देवावानेतुं ताज्जघांसया ।
धनुर्मखार्थमुपदां हरद्भिः सह गोपकैः ।। ६
महामात्रानथाहूय सत्कृत्य पुनरब्रवीत् ।
गजात् कुवलयापीडाद् द्विषौ मे मृत्युमृच्छताम् ।। ७
चाणूरादींस्ततो[3] मल्लानादिदेश महोत्थतान् ।
यदि नागाद् विमोक्ष्येते यूयं निघ्नत ताविति ।। ८
परिकल्प्य क्रियामेवं मल्लरगं महीपतिः ।
कारयामास विस्तीर्णमारेभे च धनुर्मखम् ।। ९

1 वेश ख, ग, घ, ङ 2 निशि ग, घ, ङ
3 था क, ख

अथ कंसेन निर्दिष्टः केशी तुरगदानवः ।
आविश्यापीडयद् गोष्ठमाकम्पितमहीतलः ।। १०

तस्य प्रावेशयत् कृष्णः स्वहस्तं मुखगह्वरे ।
तेन सद्यः प्रवृद्धेन रुद्धप्राणो ममार सः ।। ११

व्योमनामानमसुरं जातुचिद्गोपरूपिणम् ।
गोपान् हरन्तं दैत्यारिर्यमलोकमजीगमत् ।। १२

अक्रूरो भगवद्भक्तो दिदृक्षुः पूर्वमेव तौ ।
निदे[1]शात् स्वामिनो गोष्ठं रथेनागान्मुदान्वितः ।। १३

तं प्राप्तं पूजयामास नन्दगोपो यदूत्तमम् ।
सादरं रामकृष्णौ च स चाभूद् विगतश्रमः ।। १४

सोपायनानां गोपानां गमनं मथुरां प्रति ।
रामकृष्णसमेतानां राज्ञादिष्टमुवाच सः ।। १५

अभिप्रायं निदेशं च श्रुत्वा कंसस्य ते ततः ।
निर्ययुर्बहु संगृह्य पयोदध्याद्युपायनम् ।। १६

एष्यद्विरहसंतप्ताः सान्त्वयित्वा व्रजाङ्गनाः ।
रथेन कृष्णः साक्रूरो निर्जगाम सहाग्रजः ।। १७

मध्याह्ने मज्जते शौरिर्यमुनायां निजं वपुः ।
अत्यद्भुतं परं साक्षादक्रूराय व्यदर्शयत् ।। १८

स च भक्तया स्तुवन् देवे तिरोभूतेऽतिविस्मितः ।
प्राप्य कृष्णान्तिकं निन्ये सायं तौ मथुरां पुरीम् ।। १९

विसृष्टश्शौरिणाक्रूरः प्रविश्यान्तर्महीभुजे ।
प्राप्तौ निवेद्य तौ तेन [2]मुक्तः स्वगृहमाविशत् ।। २०

1 र्दे क 2 विसृष्टः स्वगृहं ययौ ।। ङ

तौ प्रविश्य पुरीं तत्र पश्यन्तौ परमां श्रियम् ।
वयस्यैर्गोपकैः सार्धं चेरतुर्मानितौ जनैः ।। २१

कंसस्य रजकं कृष्णः पथि वासांस्ययाचत ।
अदातारं च तं हत्वा तान्युपादत्त सानुगः ।। २२

सुदामा मालिकस्ताभ्या[1]मददादुत्तमस्रजः ।
ददतुस्तौ प्रपन्नाय वरांस्तस्मै सुदुर्लभान् ।। २३

राजमार्गे त्रिवक्राख्या कापि कुब्जा नृपोचितम् ।
अंगरागमनङ्गार्ता ददौ कृष्णाय याचते ।। २४

ऋजूकृत्य हरिः कुब्जां सद्यः स्वविरहाक्षमाम् ।
विसृज्य मधुरैर्वाक्यैश्चचार नगरे सुखम् । २५

धनुर्मखाय विपुलं पूज्यमानं दृढं धनुः ।
भङ्क्त्वा योधान् विगृह्णानान् सोऽनयत् साग्रजः क्षयम् ।। २६

अस्तं गच्छति सूर्ये तौ संप्राप्तस्य पुरान्तिकम् ।
नन्दस्य शकटं प्राप्य तत्र तावूषतुर्निशाम् ।। २७

श्रुत्वा कर्म तयोर्भीतः[2] कंसः प्रातः परेऽह्न्यपि ।
कारयामास तौ हन्तुं मल्लक्रीडामहोत्सवम् ।। २८

मञ्चेषूपाविशद् द्रष्टुमुत्सवं सकलो जनः ।
कंसश्च सहसा[3]मात्यै राजमञ्चे व्यरोचत ।। २९

ततः कृष्णश्च रामश्च रङ्गद्वारमुपेयतुः ।
तौ रुरोध गजारुढो महामात्रोऽतिगर्वितः ।। ३०

1 भ्यां दत्तवानुत्त ग, घ, ङ

2 मः भीतः कंसः परे ग, घ, ङ 3 मन्त्रै ख, घ

गजं कुवलयापीडं हत्वा तं हस्तिपानपि ।
गजदन्तायुधौ [1]वीरौ रङ्गं विविशतुः क्षणात् ॥ ३१
चाणूरमवधीत् कृष्णो मुष्टिकं च रणे हली ।
हत्वा मल्लांस्तथैवान्यान् स्वैरमक्रीडतामुभौ ॥ ३२

तान् सर्वान् निहतान् दृष्ट्वा क्रीडन्तौ तौ च बालकौ ।
भृत्या[2]नत्यादिशत् कंसः क्रोधपर्याकुलाक्षरः[3] ॥ ३३
उत्सार्येतामिमौ रंगान्नन्दगोपो निबध्यताम् ।
हन्यतां वसुदेवश्च सानुजश्चोग्रसेनकः ॥ ३४
ततः क्रोधाकुलश्शौरिर्मञ्चाग्रेऽदृश्यत क्षणात् ।
अग्रहीच्चाशु तं मौलावुग्रतेजाः खलं बलात् ॥ ३५
मञ्चान्निपात्य तं रङ्गे तस्योपर्यपतत् स्वयम् ।
निष्पिष्टगात्रं रभसाच्चकर्ष च महीतले ॥ ३६

कंसस्यावरजानष्टौ क्षिप्रमापततो रुषा ।
बलः परिघमादाय पञ्चतामनयद् द्रुतम् ॥ ३७
निहत्य कंसं निगलाद्वि[3]मुच्य पितरौ च तौ ।
रामकृष्णाववन्देतामुभौ सप्रश्रयं मुदा ॥ ३८
हतानां भगवांस्तेषां कारयित्वौर्ध्वदेहिकम् ।
राजपत्नीः समाश्वास्य प्रकृतीरभिनन्द्य च ॥ ३९

1 देवौ क, ख 2 न् समादि क
3 रम् ॥ ख, ग, घ, ङ 3 दुन्मु ग, ङ

उग्रसेनं महात्मानं विमुच्य चिरसंयतम् ।
साम्राज्ये स्थापयामास यदूंश्च सममानयत् ।। ४०

नन्दगोपमथासाद्य सानुबन्धं प्रियंवद[1]: ।
प्रास्थापयन्नि[2]जं स्थानं धनैः संतर्प्य माधवः ।। ४१

देशान्तरेभ्यश्चानाय्य यदून् कंसभयाद् गतान् ।
स्थापयित्वा स्वगेहेषु वसुभिः पर्यतोषयत् ।। ४२

धर्मपालेन [3]देवेन पाल्यमाना महात्मना ।
अधश्चकार मधुरानगरीममरावतीम् ।। ४३

शमभाजिनिरस्तशत्रुवर्गे
लसदक्रूरविशुद्धवृत्तिरम्ये ।
महतां मनसीव साधुयुक्ते
मधुमाथी मथुरापुरी विरेजे ।। ४४

1 दम् । ङ 2 जस्था खं

3 हरिणा ग, घ, ङ

षष्ठः सर्गः

अथोपनयनं कृत्वा वसुदेवः कुमारयोः ।
सान्दीपनेः सकाशं तौ विद्यार्थं प्राहिणोदृषेः ॥ १

दिवसानां चतुःषष्ट्या विद्याः संगृह्य तावतीः ।
व्रियतां दक्षिणेत्येवं तौ गुरुं [1]तमवोचताम् ॥ २

सह पत्न्या सः संमन्त्र्य प्रभाते नष्टमर्भकम् ।
वव्रे सुतं तथेत्युक्त्वा प्रस्थितौ च रथेन तौ ॥ ३

ततः पञ्चजनं नाम शङ्खरूपधरं हरिः ।
गुरुपुत्रं ग्रसं दैत्यं समुद्रवचसावधीत् । ४

पाञ्चजन्यं महाशङ्खं गृहित्वा तच्छरीरजम् ।
ययौ पुरं कृतान्तस्य साग्रजः सकलेश्वरः ॥ ५

तेनार्पितं शिशुं दत्वा गुरवे परितो[2]ऽच्युतः ।
मथुरां प्राप्य पौराणां चक्रतुस्तौ परां मुदम् ॥ ६

गोपीनामात्मविश्लेषादातुराणां शुचं नुदन् ।
उद्धवं प्राहिणोत् कृष्णः सखायं गोकुलं प्रति ॥ ७

स गत्वाश्वास्य गोपस्त्रीर्यशोदां नन्दमेव च ।
पुनरागत्य तद्वार्तां कृष्णायाचष्ट यादवः ॥ ८

अथ त्रिवक्रां करुणां कुब्जां [3]कामार्दितां चिरम् ।
उपेत्य रमयामास रमणीयां रमापतिः ॥ ९

अक्रूरस्यालयं गत्वा पूजितस्तेन सादरम् ।
प्रेषयामास पार्थानामवस्थां ज्ञातुमाशु तम् ॥ १०

1 स ख 2 तोष्य तम् । ख

3 विरहकातराम् ग, घ, ङ

स हस्तिनपुरं गत्वा धृतराष्ट्रं सहात्मजम् ।
ददर्श भीष्मं विदुरं कुन्तीं पार्थांस्तथापरान् ।। ११

नृशंसैः सौबलीपुत्रैर्गरदानादि यत्कृतम् ।
[1]तच्छृण्वन् सोऽवसत्तत्र कञ्चित्कालं पृथान्तिके ।। १२

मथुरां पुनरागत्य कृष्णाय परिपृच्छते ।
कथयामास तत्सर्वं विस्तराद् गान्दिनीसुतः ।। १३

अस्तिः प्रास्तिश्च कंसस्य भार्ये द्वे हतभर्तृके ।
जग्मतुः पितुरभ्याशं जरासन्धस्य दुःखिते ।। १४

जामातरं हतं श्रुत्वा यदुनाथेन शौरिणा ।
अयादवीं महीं कर्तुमुदयुङ्क्त स वीर्यवान् ।। १५

अक्षौहिणीभिर्विंशत्या तिसृभिश्च समावृतः ।
रुरोध मथुरां राजा यदव[2]श्चापि निर्ययुः ।। १६

[3]तावदाकाशतस्तत्र देवयोर्योत्स्यमानयोः ।
अवतीर्णौ रथौ दिव्यायुधसमन्वितौ ।। १७

मागधस्य बलं सर्वं शार्ङ्गधन्वा विनाश्य तत् ।
मुमोच पुनरप्येष सेनामानेष्यतीति तम् ।। १८

वारान् सप्तदशैवं स निर्जितो विमुखो गतः ।
उत्साही समरोद्योगं भूयोऽपि कृतवान् नृपः ।। १९

अत्रान्तरे यदुपुरीं नारदप्रे[4]रितो बली ।
रुरोध कालयवनस्तिसृभिर्म्लेच्छकोटिभिः ।। २०

1 संश्रृ घ 2 श्च विनि ख, ङ

3 श्लोकार्धोऽयं ग, ङ पाठयोर्न दृश्यते ।

4 षि ग, घ, ङ

तदा विचिन्त्य भगवान् बान्धवान् परिरक्षितुम् ।
मध्येसमुद्रमकरोद्दुर्गं द्वारवतीपुरम् ॥ २१

शुशुभे सा पुरी दिव्या निर्मिता विश्वकर्मणा ।
साक्षादिव दिवः क्षोणीमवतीर्णामरावती ॥ २२

सुधर्मां प्राहिणोदिन्द्रस्तत्र वैश्रवणो निधीन् ।
दिव्यान्यन्यानि वस्तूनि तथैवान्ये सुरेश्वराः ॥ २३

आधाय तत्र मित्राणि यवनाय युयुत्सवे ।
आत्मानं दर्शयामास मथुराद्वारि माधवः ॥ २४

स भीत इव दुद्राव सुदूरं पुरतो रिपोः ।
स चाप्यन्वद्रवद्देवं पद्भ्यामेव जिघृक्षया ॥ २५

संप्रविश्य गुहामद्रेस्तत्र शौरिर्न्यलीयत ।
मुचुकुन्दो नृपो यत्र शेते दत्तवरस्सुरैः ॥ २६

अनुप्रविश्य यवनः कृष्णोऽयमिति तं नृपम् ।
[1]जघानोरसि पादेन निद्रां त्यक्त्वा स चोत्थितः ॥ २७

तद्दृष्टिसंभवो वह्निर्ददाह यवनेश्वरम् ।
अदर्शयदथात्मानं तस्मै राज्ञे चतुर्भुजः ॥ २८

सुराणामुपकर्तारं [2]युद्धे भक्तं तथात्मनि ।
तमादिराजं भगवाननुगृह्य [3]विसृष्टवान् ॥ २९

प्रत्यावृत्त[4]स्ततो हत्वा यवनस्य बलं महत् ।
[5]तदीयं वित्तमनयत् पुरीं द्वारवतीं प्रति ॥ ३०

1 आजघानोरसि पदा क

2 भक्त्या युक्तं ख 3 व्यसर्जयत् ॥ क

4 त्य ततो क 5 वित्तं तदीय क

तावदागत्य रुरुधे मथुरां मगधाधिपः ।
विलोक्य कृष्णरामौ तौ [1]भयादिव पलायितौ ॥ ३१
अनुद्रुतौ[2] ससैन्येन शत्रुणा रोहतां गिरिम् ।
प्रवर्षणाख्यमत्युच्चं स चाद्रिं परितोऽदहत् ॥ ३२
तौ चोत्प्लुतौ निपत्योर्व्यां प्राप्तौ द्वारवतीं जवात् ।
जरासन्धोऽपि तौ दग्धौ मन्वानः स्वपुरं ययौ ॥ ३३
अथाऽऽनर्ताधिपो राजा ककुद्मी तनयां प्रियाम् ।
ब्रह्मणा चोदितः प्रादाद् बलदेवाय रेवतीम् ॥ ३४

प्रणयवेगसमागतबन्धुता
[3]परविशालविभूतिविभूषणः ।
प्रमदमेदुरभूसुरमण्डलो
विरुरुचे स विवाहमहोत्सवः ॥ ३५

1 जवो घ 2 तेन सै क
3 बश ख ग घ

सप्तमः सर्गः

आसीद् विदर्भराजस्य भीष्मकस्य महात्मनः ।
दुहिता रुक्मिणी नाम रमांशेन गुणाधिका ।। १

सा कृष्णस्य गुणान् श्रुत्वा नारदादतिसुन्दरी ।
तस्मिन्नासक्तचित्ताऽभूत् स तस्यामपि विश्ववित् ।। २

तस्या ज्येष्ठः खलो रुक्मी बन्धून् कृष्णाय दित्सतः ।
निरस्य दातुमारेभे शिशुपालाय तां बली ।। ३

तज्ज्ञात्वा प्राहिणोत् कञ्चिदद्विजं कृष्णाय सा रहः ।
अनुगृह्णीष्व मामार्तामिति संदिश्य दुःखिता ।। ४

निशम्य तस्याः सन्देशं कृष्णः कुण्डिनमभ्ययात् ।
चैद्योऽपि वरवेषेण प्राप्तः [1]प्रतिसराङ्कितः ।। ५

कुलदेवं ततो दुर्गामर्चयित्वा[2]ऽभिनिर्यतीम् ।
जहार रुक्मिणीं कृष्णो राजचक्रस्य पश्यतः ।। ६

चैद्यप[3]क्षास्ततः क्रुद्धा जरासन्ध[4]मुखा नृपाः ।
युद्धाय समनह्यन्त यदवश्च बलादयः ।। ७

जिताश्च यदुभिः सर्वे राजानः प्रबलैर्युधि ।
हृतदार इवाप्रीतश्चैद्यो नष्टप्रभोऽभवत् ।। ८

हनिष्याम्यद्य तं गोपं नो चेन्नेष्यामि कुण्डिनम् ।
इति प्रतिज्ञां कृत्वाशु रुक्मी युद्धाय निर्ययौ ।। ९

तं विजित्य रणे कृष्णः पुरं प्राप्य यथाविधि ।
कृत्वा विवाहं रुक्मिण्या रतिं प्राप तया सह ।। १०

हीनप्रतिज्ञो रुक्मी तु पुरं भेजे कटाह्वयम् ।
कारयित्वावसत्तत्र स्मरन् कृष्णात् पराभवम् ।। ११

1 सह नराधिपैः ।। क 2 त्वा विनि क ख
3 क्ष्या घ 4 न्धादयो नृ क

अथ सत्राजिदित्यासीत् सूर्यभक्तो यदूत्तमः ।
सत्यभामेति तस्याभूत् कन्या सर्वाङ्गसुन्दरी ।। १२
अक्रूराद्या यदुवरास्तमयाचन्त तां पृथक् ।
दास्यामीत्यब्रवीत् सर्वान् स तेभ्यो न तु दत्तवान् ।। १३
तस्मै स्यमन्तकं नाम मणिं प्रादाद्दिवाकरः ।
प्रत्यहं स्वर्णभारान् यो वमत्यष्टौ सुपूजितः ।। १४
कृष्णेन यदुराजार्थं राजार्हं तं महामणिम् ।
अभ्यर्थितः स सत्राजिद्वित्तलोभान्न दत्तवान् ।। १५
तस्यानुजः प्रसेनस्तं कण्ठे बद्ध्वा स्यमन्तकम् ।
मृगयार्थं गतो जातु सिंहेन निहतो वने ।। १६
हरमाणो मणिवरं सोऽपि जाम्बवता हतः ।
स्वगुहां प्राप्य स मणिं सूनोः क्रीडनकं व्यधात् ।। १७
अनागते प्रसेनेऽथ सत्राजिच्च तथापरे ।
शशङ्किरे रत्नलोभात्तं हतं कंसघा[1]तिना ।। १८
अभिशापमपाकर्तुं पौरैः सह वने हरिः ।
विचिन्वानः क्रमात् प्राप ऋक्षराजगुहा[2]मुखम् ।। १९
प्रविश्य [3]विलमेकाकी जाम्बवन्तं महारणे ।
जित्वा लेभे मणिं तस्य सुतां जाम्बवतीं च सः ।। २०
पुरं प्राप्य सभामध्ये कथयित्वा यथातथम् ।
ददौ सत्राजिते रत्नं स च सव्रीळमाददे ।। २१
प्रसादाय हरेस्तस्मै तं मणिं स्वसुतां च ताम् ।
स ददौ तां तु भगवानाददे न स्यमन्तकम् ।। २२
अक्रूरकृतवर्माद्यैः शतधन्वा प्रचोदितः ।
हत्वा सत्राजितं रात्रौ स्वपन्तमहरन् मणिम् ।। २३

1 वैरिणा ख, ग, ग, ङ 2 हां सु ग, घ, ङ
3 बि ख

विन्यस्य मणिमक्रूरे धावमानमनुद्रवन् ।
चक्रेण चक्रपाणिस्तं जघान श्वशुरद्रुहम् ।। २४

अक्रूरकृतवर्माणौ प्रोषतुश्च भयाकुलौ ।
अक्रूरे प्रोषितेऽभूवन् द्वारकायां महापद: । २५

तमानाय्य हरिस्तेन दर्शयित्वा स्यमन्तकम् ।
यदुसंसदि सद्वृत्ते तस्मिन्नेव न्यधात् पुन: ।। २६

आसीत् कृष्णस्य भगिनी सुभद्रा नाम कन्यका ।
दुर्योधनाय तां रामो दातुमैच्छन्नचापरे ।। २७

अर्जुनस्तीर्थयात्रायां प्रभासं समुपागत: ।
श्रुत्वा गुणगणांस्तस्या: कन्दर्पविवशोऽभवत् ।। २८

स भिक्षुवेषमास्थाय गत्वा द्वारवतीं प्रभु: ।
लब्धान्तरोऽहरत् कन्यां कृष्णेनानुमतः कृती ।। २९

शमयामास संक्रुद्धं बलभद्रं जनार्दन: ।
अन्वगाच्चार्जुनं प्रीत्या सहितो यदुपुङ्गवै: ।। ३०

पूजित: पाण्डवै: कृष्ण: शक्रप्रस्थेऽवसत् सुखम् ।
सोऽर्जुन: खाण्डवं दग्ध्वा तत्रारक्षन्मयासुरम् ।। ३१

स च कृष्णनियोगेन धर्मजस्याकरोत् सभाम् ।
जलस्थलभ्रमकरीं परेषां परमाद्भुताम् ।। ३२

कदाचिद् यमुनां प्राप्य प्रशान्तमृगयाश्रमः ।
तत्कूले सार्जुन: शौरि: कन्यकां काञ्चिदैक्षत ।। ३३

तपस्यन्तीं हरिं कान्तं लब्धुं सवितुरात्मजाम् ।
कालिन्दीं नाम तां श्रुत्वा कृष्णायाचष्ट फल्गुन: ।। ३३

रथमारोप्य दिव्यां तां यमुनातोयवासिनीम् ।
आनीय विधिवत्तस्या: पाणिं जग्राह माधव: ।। ३५

राजाधिदेव्यास्तनयां मित्रविन्दां पितृष्वसुः ।
प्रसह्य हृतवान् कृष्णः स्वयंवरसभागताम् ।। ३६

कोसलाधिपतेः सत्यां नाम नग्नजितः सुताम् ।
आकर्ण्य बृषजिल्लभ्यां भगवां[1]स्तत्पुरं ययौ ।। ३७

महोक्षान् सप्तदुर्धर्षान् हिंस्रानत्यन्तकोपनान् ।
तावद्रूपो निबद्ध्याशु परिजग्राह कन्यकाम् ।। ३८

केकयै[2]र्भ्रातृभिर्दत्तां कृष्णः सन्तर्दनादिभिः ।
उपयेमे सुतां भद्रां श्रुतकीर्तेः पितृष्वसुः ।। ३९

[3]पुत्री मद्रपतेरासीद् बृहत्सेनस्य लक्षणा ।
तस्या वरपरीक्षार्थं राजा यन्त्रमकारयत् ।। ४०

तन्मध्ये चाकरोल्लक्षं मत्स्यं दृश्यं जलेचरम् ।
तच्छेत्तुं नाशकन् बीरा [4]कर्णभीमार्जुनादयः ।। ४१

सज्यं कृत्वा धनुः कृष्णो लक्षं वीक्ष्य सकृज्जले ।
चिच्छेदैकेषुणा क्षिप्रमुपयेमे च लक्षणाम् ।। ४२

अथ भूमेः सुतो देवान् विजित्य नरकासुरः ।
अदित्याः कुण्डले जह्रे लोकांश्च समपीडयत् ।। ४३

तद्वधायार्थितः कृष्णो मघोना तार्क्ष्यवाहनः ।
गतः प्राग्ज्योतिषपुरं सहितः सत्यभामया ।। ४४

मुरपीठमुखैः सार्धं हत्वा नरकमाहवे ।
तत्राभ्यषिञ्चद्राजानं [5]भगदत्तं तदात्मजम् ।। ४५

1 वान् सत्वरं ख 2 यीं भ्रा ख

3 बृहत्सेनस्य राज्ञोऽभूल्लक्षणा नाम कन्यका । क

4 बल ग, घ, ङ 5 गुणवन्तं ख

या षोडशसहस्राणि रुद्धा भौमेन कन्यकाः ।
ताः प्रा[1]हिणोद् द्वारवतीं वाहनैर्वपुभिः सह ।। ४६

संप्राप्तस्त्रिदिवं दत्वा देवमात्रे च कुण्डले ।
सत्यभामागिरा जह्रे पारिजातं जितामरः ॥ ४७

गत्वा द्वारवतीं सर्वाः कन्यास्ता युगपत् पृथक् ।
तावद्रूपधरः शौरिरुपयेमे [2]यथाविधि ।। ४८

प्रासादेषु पृथक् तासां रममाणमनेकधा ।
बहुरूपं हरिं पश्यन्नचिन्नीयत नारदः ॥ ४९

रमणीयतमाभिरमेयगुणो
रमणीभिरुवास रमारमणः ।
पुरुभूतितया पुरुहूतपुरी -
परिभूतिकरे [3]नगरे विबभौ ।। ५०

1 पंयद् ख 2 तथापराः ।। ख
3 विबभौ नगरे ।। ख, घ, ङ

अष्टमः सर्गः

अथासूत सुतं काले प्रद्युम्नं नाम रुक्मिणी ।
श्रुत्वात्मशत्रुं तं सिन्धौ प्राक्षिपच्छम्बरोऽसुरः ॥ १

मत्स्यस्तमग्रसद्दाशास्तं हत्वा समुपाहरन् ।
शाम्बरायैव [1]तत्कुक्षौ सूदा ददृशुरर्भकम् ॥ २

तं कामदेवमाकर्ण्य नारदान्माययावृतम् ।
निवसन्ती रतिस्तत्र स्नेहेन समवर्धयत् ॥ ३

सोऽचिराद्यौवनं प्राप्तः श्रुत्वा सर्वं रतेर्मुखात् ।
निहत्य शम्बरं व्योम्ना तया प्राप्तः पुरं निजम् ॥ ४

चिरनष्टं तमालोक्य संप्राप्तं सह भार्यया ।
नारदाच्छ्रुतवृत्तान्ताः सर्वे मुमुदिरे जनाः ॥ ५

चारुदेष्णादयश्चान्ये रुक्मिण्यास्तनया नव ।
बभूवुर्गुणसम्पन्नाः कन्या चारुमती तथा ॥ ६

कृष्णस्यान्याश्च ता भार्या सर्वा दशदशात्मजान् ।
प्रतीताञ्जनयामासुस्तैस्तैः पितृसमान् गुणैः ॥ ७

रुक्मिणस्तनयां कार्ष्णिरनुरूपां स्वयंवरे ।
जह्रे रुक्मवतीं नाम युधि निर्जित्य पार्थिवान् ॥ ८

तस्यां बभूव तनयः प्रद्युम्नस्य महात्मनः ।
अनिरुद्ध इति ख्यातो विरोद्धा सर्वविद्विषाम् ॥ ९

स चापि रुक्मिणः पौत्रीं परिजग्राह रोचनाम् ।
जग्मुर्भोजकटं तस्मिन् विवाहे सर्वयादवाः ॥ १०

द्यूतक्रीडाभवत्तत्र बलदेवेन रुक्मिणः ।
अजयच्च निकृत्या तं रुक्मी परिजहास च ॥ ११

1 तं कुक्षौ क

तस्मै द्यूतसभामध्ये ददौ मृत्युं हलायुधः ।
तत्सहायान्नृपांश्चान्यानन्यायनिरतानहन् ॥ १२

अनिरुद्धं पुरस्कृत्य सभार्यमथ यादवाः ।
रामकृष्णादयस्तस्माद्ययुर्द्वारवतीं पुनः ॥ १३

अथ पुत्रो बलेरासीद् बाणो बाहुसहस्रवान् ।
द्वारपालः स्वयं यस्य त्र्यम्बको भक्तवत्सलः ॥ १४

तस्योषा नाम कन्याभूद् युवचित्त[1]प्रमाथिनी ।
सा तु कन्या पुरे सार्धं सखीभिरवसत् सुखम् ॥ १५

प्रागज्ञातेन सा स्वप्ने लेभे प्राद्युम्निना रतिम् ।
प्रबुद्धा तमपश्यन्ती सखीमध्येऽरुदत्तराम् ॥ १६

चित्रलेखा सखी तस्या यूनस्त्रैलोक्यवर्तिनः ।
चित्रेऽलिखदुषा कान्तं दृष्ट्वा 'हा सावसा'विति ॥ १७

योगिनी चित्रलेखा सा गत्वा द्वारवतीं निशि ।
सुप्तं विहायसाऽनैषीदनिरुद्धं तदन्तिकम् ॥ १८

गुणैरन्योन्ययो[2]ग्यौ तावन्योन्यप्रणयाकुलौ ।
उषानिरुद्धौ विस्रब्धौ रेमाते सुसुखं रहः ॥ १९

तज्ज्ञात्वा सहसा बाणः प्राप्तः कन्यापुरं रुषा ।
घ्नन्निन् निजबलैः शूरं नागपाशैर्बबन्ध तम् ॥ २०

तां वार्तां नारदाच्छ्रुत्वा यदुवीराः समं बलैः ।
रुरुधुः शोणितपुरं महादेवेन रक्षितम् ॥ २१

तत्र युद्धमभूद्घोरं यदूनामसुरैः सह[3] ।
कुर्वन् बाणस्य साहाय्यं कृष्णेन युयुधे हरः ॥ २२

1 वि ख 2 सदृशावन्यो क
3 मम् । क

शर्वं बाणज्वरं चाजौ जित्वा हत्वासुरान् बहून् ।
आनिन्ये द्वारकां शौरिरनिरुद्धं सहोषया ॥ २३

हरेः पुत्रैश्च पौत्रैश्च दौहित्रैस्तत्सुतैरपि ।
देवांशजैस्त[1]थान्यैश्च यदुवंशोऽभ्यवर्धत ॥ २४

कदाचिद्द्वारकोपान्ते क्रीडन्तो यदुनन्दनाः ।
कृकलासं महाकूपे ददृशुः पर्वतोपमम् ॥ २५

तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः ।
अशक्नुवन्तश्चाचख्युः कृष्णाय परमोत्सुकाः ॥ २६

तमुज्जहार भगवान् करेण करुणानिधिः ।
स्पृष्टः कृष्णेन सोऽप्यासीत् पुरुषो दिव्यविग्रहः ॥ २७

स नृगो नाम राजर्षिर्वदान्यानां पुरस्सरः ।
शापात् प्रमादजान्मुक्तस्तं नत्वा स्वरूपेयिवान् ॥ २८

एकदा बलभद्रोऽथ द्रष्टुकामः स्वबान्धवान् ।
रथमारुह्य सोत्कण्ठः प्रययौ नन्दगोकुलम् ॥ २९

अतिप्रमुदितैः प्रेम्णा नन्दाद्यैः परिपूजितः ।
वत्सरं तत्र सोऽवात्सीद् रमयन्निशि गोपिकाः ॥ ३०

वारुणीमदरक्ताक्षो रतिश्रान्तैर्वधूजनैः ।
सार्धं स्नातुमना देवो यमुनामाजुहाव सः ॥ ३१

अनागतां हलाग्रेण चकर्ष च रुषान्वितः ।
सा भीता तं प्रसाद्याथ जगाम तदनुज्ञया ॥ ३२

गते रामे हरिः श्रुत्वा पौण्ड्रकस्य महीपतेः ।
दूताद् वाचस्सुपरुषास्तद्वधाय विनिर्ययौ ॥ ३३

पौण्ड्रको वासुदेवः स काशिराजेन बन्धुना ।
सह युद्धाय सन्नेहे ततो युद्धमभून्महत् ॥ ३४

1 र्यदोर्वंशो बहुधा विस्तृतोऽभवत् ॥ क

दधानमात्मसारूप्यं कृत्रिमं पौण्ड्रकं हरिः ।
निहत्य काशिराजं च ससैन्यं स्वपुरं ययौ ।। ३५
सुदक्षिण इति ख्यातः काशिराजसुतो हरिम् ।
जिघांसुरकरोत् कृत्यामविमुक्तेशितुर्गिरा ।। ३६
सा विरूपा महाघोरा द्वारकामभ्यधावत ।
भगवांस्तद्विनाशाय सुदर्शनममुञ्चत ।। ३७
कृत्या प्रतिहता तेन कर्तारमदहन्नृपम् ।
सुदर्शनोऽप्यनुद्रुत्य दग्धवांस्तस्य तत्पुरम् ।। ३८
एकदा सह कान्ताभिरापीय वरवारुणीम् ।
गिरौ रैवतके स्वैरं व्यहरद्रेवतीपतिः ।। ३९
आजगाम तदा[1] तत्र विविदो नाम [2]वानरः ।
रामभृत्योऽपि यः पूर्वं कालाद्दुर्वृत्ततां गतः ।। ४०
स गुदं दर्शयन् धृष्टस्तर्जन् परिहसन् बली ।
कोपयामास तं देवं दुरात्मा क्षीणजीवितः ।। ४१
तदा परिभवन्तं तं लोकोपद्रवकारिणम् ।
संक्रुद्धः समरे सद्यो जघान मुसलायुधः ।। ४२
अथ दुर्योधनसुतां लक्षणां नाम कन्यकाम् ।
स्वयंवरेऽहरद्वीरः साम्बो जाम्बवतीसुतः ।। ४३
तं जित्वा कुरवो युद्धे बबन्धुर्वीर्यशालिनः ।
तच्छ्रुत्वा युद्धसन्नद्धा बभूवुर्यदुपुंगवाः ।। ४४
दुर्योधनेन शिष्येण विग्रहं रोहिणीसुतः ।
अनिच्छंस्तान्निवा[3]र्याथ प्रययौ [4]हास्तिनं पुरम् ।। ४५

1 दुद्देशं ख 2 दानवः । ख
3 र्यैकः ख 4 हस्तिनापु क

सान्त्वयन् कुरुवीरांस्तैर्बलोऽतिसक्तैरनादृतः ।
हलेन तां पुरीं क्रोधादाचकर्ष सकौरवीम्[1] ।। ४६

गङ्गायां निपतद्दृष्ट्वा स्वपुरं [2]त्रस्तचेतसः ।
साम्बं सभार्यं निर्याप्य प्रणेमुः कौरवाः प्रभुम् ।। ४७

बलः प्रसन्नस्तं पुत्रमादाय स्नुषया सह ।
द्वारकामेत्य तद्वृत्तं कथयामास संसदि ।। ४८

अनिवारितप्रसरबाहुबल-
प्रथिमव्युदस्तकलिना हलिना ।
अपनीयमानपरितापभरा-
मवनीमपादखिललोकपतिः ।। ४९

1 वाम् ।। क 2 त्रं श्री

नवमः सर्गः

अथोपरागे सूर्यस्य कदाचित् सकला जनाः ।
समाजग्मुः कुरुक्षेत्रं सर्वपापविनाशनम् ।। १

राजानः सानुगाः सर्वे सशिष्या मुनयस्तथा ।
वैश्याः शूद्राश्च सङ्कीर्णा नानादिग्भ्यः समा[1]गताः ।। २

अन्योन्यं समगच्छन्त बान्धवाः स्नेहकातराः ।
ते सर्वे परमप्रीता बभूवुः कृष्णदर्शनात् ।। ३

दृष्ट्वा कृष्णस्य भार्यास्ताः पाञ्चाली परमादृता ।
प्रकारं परिपप्रच्छ तासां पाणिग्रहे तदा ।। ४

स्वं स्वं विवाहवृत्तान्तं सर्वास्ताः परमाङ्गनाः ।
कृष्णायै कथयामासुर्विस्तरेण यथातथा ।। ५

मुनयस्तत्र सुप्रीता वसुदेवमयाजयन् ।
तुष्टुवुश्च जगन्नाथं प्रशशंसुश्च यादवान् ।। ६

नन्दगोपमुखा गोपा यदवश्चाच्युताश्रयाः ।
परस्परं समागम्य बभूवुर्मुदिता भृशम् ।। ७

कृष्णो रहसि संगम्य वियोगपरिपीडिताः ।
आलिङ्ग्याश्वास्य वचनैरनुजग्राह गोपिकाः ।। ८

उषित्वा तत्र मासांस्त्रीन् [2]कथयन्तः परस्परम् ।
वीक्ष्य प्रावृषमासन्नां सर्वे जग्मुर्यथागतम् ।। ९

एकदाथ सुधर्मायां सभायां सह यादवैः ।
उग्रसेनमुखैः शौरिरध्यास्त परमासनम् ।। १०

जरासन्धेन संरुद्धैः राजभिः प्रेषितस्तदा ।
प्राप्य दूतः प्रभुं तेषामयाचत विमोचनम् ।। ११

1 वृताः ।। क 2 प्रीण – ख

इदानीमवतीर्णः खात् [1]सहसा नारदो मुनिः ।
पूजितः सुखमासीनः स्तुत्वा स हरिमब्रवीत् ।। १२
राजसूयेन गोविन्द धर्मपुत्रो यियक्षते ।
तत्र[2] धर्मात्म[3]नस्स[4]त्वं साहाय्यं क्रिय[5]तामिति ।। १३
श्रुत्वा दूतस्य तद्वाक्यं नारदस्य च माधवः ।
कार्ययोर्युगपत्प्राप्त्या संशयं प्रत्यपद्यत ।। १४
आसन् बहुविधाः पक्षाः सभ्यानां तत्र जल्पताम् ।
उद्धवोऽथाब्रवीत् कृष्णं पृष्टः शिष्यो बृहस्पतेः ।। १५
कार्यं पितृष्वसे यस्य साहाय्यं ते महाक्रतौ ।
तत्र दिग्विजये देव जरासन्धश्च हन्यताम् ।। १६
राज्ञां दत्वाऽभयं दूतं विससर्ज ततो हरिः ।
नारदोऽपि तमापृच्छ्य जगामाकाशवर्त्मना ।। १७
ततः सभार्यः ससुतः सा[6]नुगः सहबान्धवः ।
अचिरादाययौ शौरिः शक्रप्रस्थं पुरोत्तमम् ।। १८
पाण्डवास्तमुपायान्तं प्रत्युद्गम्य मुदान्विताः ।
विधिवत् पूजयामासुः प्रेमोत्कण्ठातरंगिताः ।। १९
कृष्णेन सह समन्त्र्य धर्मजः कृतनिश्चयः ।
तमेव मागधं हन्तुं स भीमार्जुनमादिशत् ।। २०
ततो गिरिव्रजं गत्वा नगरं मधुसूदनः ।
नियुद्धे घातयामास भीमसेनेन मागधः ।। २१
तत्राभिषिच्य तत्पुत्रं सहदेवं दयानिधिः ।
जरासन्धनिरुद्धांस्तान् मोचयामास पार्थिवान् ।। २२

1 तर ख 2 स्य क 3 थि ख
4 स्तत्र क 5 तां त्वया ।। क
6 मात्यः क

सहदेवेन सतकार्यं राजयोग्यैः परिच्छदैः ।
सर्वांस्तान् भक्तिसम्पन्नान् स्वदेशात् समयासयत् ।। २३

ययुश्च खाण्डवप्रस्थं वीरास्ते निहतारयः ।
ततो दिग्विजये भ्रतॄन् न्ययुङ्क्त चतुरो नृपः ।। २४

भीमसेनोऽजयत् प्राचीमुदीचीं दिशमर्जुनः ।
प्रतीचीं नकुलोऽवाचीं सहदेवश्च वीर्यवान् ।। २५

ततो जितमहीपालः समाहृतधनोच्चयः ।
राजसूयं समारेभे राजा सह मुनीश्वरैः ।। २६

दुर्योधनादयस्तत्र कुरुवीरा समाययुः ।
राजानश्चापरे सर्वे तथान्ये सकला जनाः ।। २७

योग्यं तत्राग्रपूजायां विमृशन्तः सभासदः ।
नैव निश्चयमाजग्मुः सहदेवो[1]ऽब्रवीद् वचः ।। २८

अस्मिन् सन्निहिते साक्षात् सर्वात्मनि जनार्दने ।
कोऽन्यो जगति पूज्यः स्यात् संशयो नात्र सांप्रतम् ।। २९

तद्वाक्यं तस्य सर्वेषामभवत् सम्मतं सताम् ।
तत्राऽग्रपूजामकरोद् वासुदेवाय पाण्डवः ।। ३०

कृष्णं सभाजितं दृष्ट्वा सभामध्येऽभिमानवान् ।
शिशुपालः प्रचुक्रोध भर्त्सयामास चासकृत् ।। ३१

वाचाटस्य त[2]दा तस्य शिरश्चक्रेण तत्क्षणात् ।
चिच्छेद समरे कृष्णः स साक्षात् प्राप तत्पदम् ।। ३२

शास्त्रदृष्टेन मार्गेण कृत्वा सर्वाः क्रिया नृपः ।
चकारावभृथस्नानं सर्वराजनमस्कृतः ।। ३३

कञ्चित्कालं नरेन्द्रेण तेन सौहार्दशालिना ।
पूज्यमानाः पुरे तस्मिन्नवसन्नवनीश्वरः ।। ३४

1 वस्तदाब्रवीत् ।। ख   2 था क

तत्रैकदानुजैः सार्धं किरीटी चारुकुण्डलः ।
सभां मयकृतां पश्यन् सञ्चचार सुयोधनः ।। ३५

जलेऽपतन् स्थलं मत्वा जलं मत्वा स्थले पुनः ।
उदगृह्णत् स वस्त्रान्तं मयमायाविमोहितः ।। ३६

इति संप्राप्तवैलक्ष्यं जहसुस्तं तदा जनाः ।
उच्चैः पर्यहसद् भीमः पाञ्चाली च वराङ्गना ।। ३७

अन्वमोदत तं हासं कटाक्षैः कैटभान्तकः ।
भारावतरणं भूमेः करिष्यंस्तेन हेतुना ।। ३८

धर्मजस्य श्रियं दृष्ट्वा प्रागेवामर्षदीपितः ।
द्विगुणां विकृतिं भेजे परिहासात् सुयोधनः ।। ३९

ततो जगाम संक्रुद्धः स नागोपपदं पुरम् ।
देवने पाण्डवाञ्जेतुं येते च सहमातुलः ।। ४०

आपूर्यैवं धर्मराजस्य वाञ्छां
बीजन्यासं सर्वभारापहारे ।
कृत्वा भूमेश्चाथ सुप्रीतचेता
रेमे शौरिस्तत्र मित्रैः समेतः ।। ४१

दशमः सर्गः

एतस्मिन्नन्तरे साल्वः शिशुपालसखो नृपः ।
तपसा तोषिताच्छम्भोर्लब्धं सौभमयोमयम् ॥ १

आकाशचरमारुह्य सैन्येन महतावृतः ।
पुरीं द्वारवतीं वीरो रुरोध च बभञ्ज च ॥ २

तत्र प्रद्युम्नमुख्यानां यादवानां महात्मनाम् ।
साल्वैः सहाभवद् युद्धं वासरान् सप्तविंशतिम् ॥ ३

अथ दृष्ट्वा निमित्तानि क्रूराणि गरुडध्वजः ।
इन्द्रप्रस्थाद्[1] रणाशङ्की द्रुतं द्वारवतीं ययौ ॥ ४

दर्शयन्तं महामायाः [2]सौभराजं गदाधरः ।
प्रेषयामास [3]समरे यमस्य सदनं प्रति ॥ ५

निहत्य दन्तवक्त्रं च तथा वीरं विडूरथम् ।
प्राविशद् द्वारकां कृष्णः स्तूयमानः सुरर्षिभिः ॥ ६

तस्मिन् पुरे विहरतोर्देवयोरथ पाण्डवाः ।
जिताः शकुनिना द्यूते द्वादशाब्दान् वनेऽवसन् ॥ ७

अज्ञातवासे निर्वृत्ते राज्यहेतोर्महारथाः ।
युद्धाय समनह्यन्त पाण्डवाः कुरवस्तथा ॥ ८

[4]उपप्लाव्यं गते कृष्णे सह गाण्डीवधन्वना ।
मध्यस्थस्तीर्थयात्रायै रामश्चक्रे मनो[5]रथम् ॥ ९

भगवान् भारते युद्धे सूतो भूत्वा किरीटिनः ।
घातयित्वा[6]मितान् राज्ञः संजहार भुवो भरम् ॥ १०

1 स्थात् पुरवराद् ख
2 साल्व ख
3 संग्रामे ख
4 गते मात्स्यपुरं ख
5 नस्तथा क
6 त्वा मिथो क

सारस्वतानि तीर्थानि सेवमा[1]नस्तदा बलः ।
जगाम नैमिशं यस्मिन् ऋषयः सत्रमासत ।। ११
तत्र पौराणिकं सूतमासीनं रोमहर्षणम् ।
आत्मन्यकृतसत्कारमस्त्रेण हतवान् [2]प्रभुः ।। १२
ऋषिभिर्याचितः खिन्नैस्तेषामर्थे तदात्मजम् ।
तत्पदे तादृशं ज्ञानमुग्रश्रवसमादधे ।। १३
इल्वलस्य सुतं क्रूरं वल्कलं नाम दानवम् ।
जघान वचसा तेषां [3]सत्रविघ्नकरं बलः ।। १४
[4]ततः क्षेत्राणि तीर्थानि सेवमानो हलायुधः ।
प्रादक्षिण्यक्रमेणोर्व्याः कुरुक्षेत्र[5]मुपागतः ।। १५
तस्मिञ्छवशताकीर्णे सुयोधनवृकोदरौ ।
गदायुद्धाय सन्नद्धौ ददर्श रुषितौ भृशम् ।। १६
तौ निवर्तयितुं युद्धात् स्निग्धः प्रययते स्म सः ।
अनादृतः पुनस्ताभ्यां द्वारकां प्रत्यपद्यत ।। १७
तं पुनर्नैमिशं प्राप्तमृषयोऽयाजयन्मुदा ।
तेभ्यो विशुद्धविज्ञानं ददौ देवः प्रसन्नधीः ।। १८
अधर्मनिरतान् राज्ञो नाशयित्वा जनार्दनः ।
यथावद् वर्तयामास धर्मं धर्मसुतादिभिः ।। १९
कुचेलो नाम विप्रोऽ[6]भून्निर्धनः श्रीपतेः सखा ।
स्वधर्मनिरतो विद्वान् सदारः स्व[7]गृहेऽवसत् ।। २०
तस्य भार्या पतिं स्निग्धमयाचत् क्षुधयार्दिता ।
'याचस्व कृष्णं सोऽर्थं ते दास्यती'त्यर्थकांक्षिणी ।। २१

1 नः क्रमाद् ख 2 वि क 3 यज्ञ ख
4 सेवमानोऽथ तीर्थानि क्षेत्राणि च सह द्विजैः । क
5 त्रं शनैर्ययौ ।। ख
6 भूत् सखा कृष्णस्य निर्धनः । ख
7 सोऽवसद् गृहे । ख

स्वल्पान् याचितकांश्चास्मै पृथुकान् प्राभृतं ददौ ।
स तानादाय विप्रेन्द्रः प्रययौ द्वारकां पुरीम् ।। २२
अभीक्ष्णं पूजितस्तैस्तै[1]: कामैः कृष्णेन स द्विजः ।
मेने स्वर्गस्थमात्मानं ब्रह्मलोकस्थमेव वा ।। २३
अकाम्यकर्मणः पूर्वं पृथुकांस्तस्य माधवः ।
एकमुष्टिमितां जग्ध्वा [2]गृहे तस्यातनोच्छ्रियम् ।। २४
परेद्युः स्वगृहं प्राप्य दृष्ट्वा तत्रोत्तमां श्रियम् ।
विस्मितः सोऽवसत्तत्र प्रीतया जायया सह ।। २५
श्रुत्वा [3]पुत्रं गुरोर्नीतं पुत्राभ्यामतिविस्मिता ।
द्रष्टुं कंसहतान् पुत्रांस्तावयाचत देवकी ।। २६
तौ प्रविश्य बलेः सद्म तेन भक्तेन पूजितौ ।
तत आदाय षड्गर्भान् क्षणात् प्राप्तौ निजं पुरम् ।। २७
तान् दृष्ट्वा देवकी पुत्रान् वसुदेवश्च विस्मितौ ।
आलिङ्ग्याघ्राय शिरसि प्रापतुः परमां मुदम् ।। २८
ते च प्रजापतेः पुत्राः प्रसादेन जगत्पतेः ।
विमुक्तशापाः स्वं लोकं प्रययुर्दिव्यमूर्तयः ।। २९
विष्णुभक्तोऽपि देहेषु बहुलाश्वोऽभवन्नृपः ।
तत्रैव श्रुतदेवा[4]ख्यो विप्रश्चासीत्तथाविधः ।। ३०
अनुगृहीतुं तौ कृष्णस्तत्रागादृषिभिः सह ।
रूपद्वयेन युगपदुभयोः प्राविशद् गृहान् ।। ३१
ताभ्यां संभावितो नीत्वा कतिचित्तत्र वत्सरान् ।
अनुगृह्य प्रपन्नौ तौ भूयः प्रत्यागमत् पुरीम् ।। ३२
अथ बन्धुजनं द्रष्टुं सव्यसाची महायशाः ।
संप्राप्तो न्यवसत्तत्र पूज्यमानो यदूत्तमैः ।। ३३

1 स्तैर्भाग्यैः क   2 तद्गृहे व्यतनो क
3 नीतं गुरोः पुत्रं ख   4 वोऽपि ख

तत्र कस्यापि विप्रस्य जातमात्राः कुमारकाः ।
स्पृष्ट्वा भुवं जहुः प्राणान् स चुक्रोश पुरान्तिके ।। ३४

[1]"रक्षिष्यामि प्रजान् तेऽहं'मित्युवाच तमर्जुनः ।
नैतच्छक्यं त्वयेत्युक्तो ब्राह्मणेन ततोऽब्रवीत् ।। ३५

कृष्णसङ्कर्षणाभ्यामप्यधिकं विद्धि मां द्विज ।
नैतच्छक्यामि चेत् सद्यः प्रवेक्ष्यामि हुताशनम् ।। ३६

स विप्रेण समं गत्वा गृहं तस्या द्विजस्त्रियाः ।
आसन्ने प्रसवेऽरक्षद् दिव्यास्त्रैः सूतिकागृहम् ।। ३७

जातमात्रस्स बालस्तु क्षणेनादृश्यतामगात् ।
भर्त्सयामास बीभत्सुं ब्राह्मणः स पुनः पुनः ।। ३८

अर्जुनो योगमास्थाय सर्वलोकेषु बालकम् ।
विचिक्य तमदृष्ट्वैव पुनरायात्त्रपाकुलः ।। ३९

अग्निं प्रवेष्टु[2]कामं तं निवार्य पुरुषोत्तमः ।
सह तेन महायोगी [3]प्रतीचीं प्राविशद् दिशम् ।। ४०

द्वीपान् सिन्धून् गिरींश्चा[4]शु सप्तातीत्य महत्तमः ।
सुदर्शनेन निर्धूय ददर्श भुवनं महत् ।। ४१

तत्र सर्वजगन्नाथमनन्तशयनं प्रभुम् ।
अपश्यदाद्यमव्यक्तमात्मनः प्रकृतिं पराम् ।। ४२

भक्तया प्रणम्य तौ देवमस्तुवातां कृताञ्जलिः ।
अभिनन्द्यात्मनो भागौ तौ जगाद जगत्पतिः ।। ४३

1 अहं रक्ष्यामि ते पुत्रानित्युवाच धनञ्जयः । ख
2 मारब्धं तं निवार्याच्युतो रथी । क
3 रथमारुह्य निर्ययौ ।। ख
4 थ लङ्घयित्वा ख

युवां दिदृक्षमाणेन मया नीता द्विजार्भकाः ।
नीयन्तां स्वगृहं वीरौ धर्मं स्थापयितुं भुवि ॥ ४४
इत्युक्तौ देवदेवेन समादाय द्विजात्मजान् ।
क्षणादाजग्मतुः कृष्णौ द्वारकां सागराम्बराम् ॥ ४५

लब्ध्वा पुत्रान् द्विजस्तुष्टो ददौ ताभ्यां वराशिषः ।
पूजितश्शौरिणा जिष्णु[1]रिन्द्रप्रस्थं ततोऽगमत् ॥ ४६
एवं स भगवान् विष्णुरवतार्य भुवो भरम् ।
स्थापयन् परमं धर्मं ररक्ष सकलं जगत् ॥ ४७
[2]सान्निध्यं यत्र नित्यं त्रिजगति नगरे तत्र च द्वारवत्या-
मातिष्ठन् सम्यगर्थत्रयममलमनोहारि कल्याणकीर्तिः ।
पुत्रैर्मित्रैः कलत्रै[3]र्गुरुभिरनुचरैस्सार्धमन्यैश्च धन्यैः
रेमे [4]विश्वैकनाथो जननयनसमापीयमानांगलक्ष्मीः ॥

इति गोविन्दचरितम् समाप्तम्

1 श्शक्र ख 2 स्थानं यत्त्रोपनन्द्य ख
3 स्सखि ख 4 कान्तो रमाया ख